नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

# VU—94–Sans. Vangmay

No. of Printed Pages — 3

## वरिष्ठ उपाध्याय परीक्षा, 2013

### संस्कृत वाङ्मय ( अनिवार्यः )

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. अभिनवबाणपदेन समीक्षकाः कं सम्बोधयन्ति ? 1
2. शिवराजविजयस्य कथावस्तु कति विरामेषु विभक्तं वर्तते ? 1
3. शिववीरः कस्य कवितां श्रुत्वा विंशतिः गजाः तस्मै दत्तवान् ? 1
4. वीरभूमिकाव्यस्य रचनाकारः कोऽस्ति ? 1
5. उत्पीडितः कृशतामुपेतो विशरणो धर्मः कस्य शरणमागतवान् ? 1
6. मत्स्याकारः चित्रकूटः कस्य वंशस्य रक्षामकरोत् ? 1
7. वीरभूमिकाव्ये कस्य वृत्तस्य प्रयोगो वर्तते ? 1
8. ''तव्यत्तव्यानीयरः'' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2
9. ''चार्थे द्वन्द्वः'' इति सूत्रस्य व्याख्या कार्या । 3
10. 'शिवराजविजयमेकमुपन्यासात्मकमुत्कृष्टं गद्यकाव्यमस्ति' कथनमिदं विवेचयत । 3
11. वीरभूमिकाव्यस्य भाषासौष्ठवं स्पष्टयत । 3
12. अधोलिखितयो**रेकस्य** श्लोकस्य सप्रसंग व्याख्या विधेया — 4

(क) प्रोद्भासितं यवनचक्रविघट्टनेन
श्रीचित्रकूट इति विश्रुतमद्रिरत्नम् ।
पुष्णाति कान्तिमतुलामुरसोहि यस्याः
सा मेदपाटवसुधा कथमस्तु वर्ण्या ॥

(ख) अत्रैव माधवपदाब्जसुधाप्रमत्ता
मीराँ ननर्त गलितस्वपराभिमाना ।
घोरं हलाहलमिहैव तदीयहस्ते
श्रीनन्दसूनुचरणामृततां प्रपेदे ॥

13. निम्नलिखितयो**रेकस्य** श्लोकस्य भावार्थो लेख्यः — 4

(क) आलोकिता वसुमती सकलापि किन्तु
नालोकितः सुरुचिरो यदि मेदपाटः ।
क्लिष्टं मुधा सफलता तु विलोचनस्य
श्रीमेदपाट वसुधासुषमाऽवलोकात् ॥

(ख) श्रीकुम्भकर्णनृपकीर्त्तिलतावलम्बं
स्तम्भं पुरः कलय निर्जितमेरुशोभम् ।
यद्रत्नसानुमपि दूरतरं विहाय
देवाः प्रसन्नमनसः सततं श्रयन्ते ॥

14. अधोलिखितेषु **पञ्चानां** वाक्यानां संस्कृतभाषायामनुवादो विधेयः — 5 × 1 = 5

(i) पाठशाला के चारों ओर वृक्ष हैं ।
(ii) मोहन को रामायण काव्य अच्छा लगता है ।
(iii) तीन छात्राओं ने चार फल खाये ।
(iv) विद्या की शोभा धर्म से होती है ।
(v) ऋग्वेद संस्कृत साहित्य का आदिग्रन्थ है ।
(vi) रात्रि जायेगी और सुप्रभात होगा ।
(vii) राम, मोहन और मैं कल मन्दिर जायेंगे ।
(viii) जाते हुए बालक को देखो ।

15. अधोलिखितेषु कमपि **एकं** विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत — 5

(i) मम प्रिय: कवि:

(ii) परोपकाराय सतां विभूतय:

(iii) स्त्री शिक्षाया आवश्यकतोपयोगिताश्च

(iv) भ्रष्टाचार: ।

16. निम्नलिखितेषु **पञ्चानां** पदानां संघटनां विधाय वाक्येष्वपि प्रयोगं कुरुत — $5 \times 1 = 5$

(i) दृश् + तुमुन्

(ii) पच् + शानच्

(iii) किम् + तसिल्

(iv) धा + क्त

(v) प्रियं वदतीति

(vi) अश्मनो विकार:

(vii) पितुर्भ्राता

(viii) हरे: सादृश्यम् ।

17. निम्नांकितेषु गद्यांशेषु कयोश्चिद् **द्वयो:** सप्रसंग व्याख्या विधेया — $2 \times 4\frac{1}{2} = 9$

(क) जाल्म-यवनाखेटव्यसनिन: शिववीरस्य शनै: शनैर्दिल्लीश्वरेणापि सह वैरं ववृधे । दिल्लीश्वरस्तु शास्तिखान-नामानं कञ्चिद् यवन-वीरं प्रेष्य पुण्यनगरं तद्धस्तादाचिच्छिदे । सम्प्रति हि पुण्यनगरे शिववीराध्युषितचरे महाप्रासादे सपरिवार: शास्तिखान: प्रतिवसति । आसन्ने सिंहदुर्गे च ससेन: शिववीरो विराजते । परस्परं च च्छलाशङ्का युद्धाशङ्काश्च जरीजृम्भन्ते ।

(ख) न वयं मीनानिव पीनान् , इमानिव तुन्दिमान् , भेकानिव निर्विवेकान् , वृषदंशकानिव कपट-हिंसकान् , काकानिवाऽऽस्वादितदुर्विपाकान् , वलीमुखानिव चञ्चल-मुखान् , शृगालानिव कलित-धूर्त्ततामालान् द्विजिह्वान् , सजीवानिवोपबर्हान् , आत्मस्तुतिमात्ररुचीन्, मूर्तिमत इवाभिमानान् , विद्या-शून्यान् , गुण-गण-गुण-ग्रहणासमर्थान् , मिथ्या-मोद-रतान् , वाराङ्गनाव्रात-चरणपाताधात-सहान् , मद्य-कीटान् , द्यूतानन्यभक्तान् नृपम्मन्यान् स्वप्नेऽपि समुपास्महे ।

(ग) निर्दिष्टस्थान उपविश्य च, स एवायं पूर्वदृष्टो वीर इति निरीक्ष्य "अहो ! वीरो वीरो वीर: । वीरमेवान्विष्यन् दिल्लीत इतो यावत् समायातोऽस्मि, वीरमेव च प्राप्तवानस्मि । विजयतां धर्मोद्धारण-धीर:, सपत्नोत्सारण-समीर:, वीरो महाराज" इत्युदीर्य किञ्चित् स्मयमानस्य महाराजस्य मुखमवलोकयंस्तत्प्रशंसायां वीररसमयीं कवितामेकामपठत् ।

(घ) अस्तमिते भगवति मरीचिमालिनि अन्धकारेण व्याप्तासु हरित्सु, किञ्चित् किञ्चिच्चमत्कुर्वत्सु नक्षत्रेषु , शिववीरेणाध्युषितचरस्य महाप्रसादस्याट्टालिकायामात्मीयै: शास्तिखान: समुपविष्टोऽस्ति । परितश्चानेके योद्धारो मौद्गला: पर्यवातिष्ठन्त । परितो दीपमाला चकास्ति । पुष्पवाटिकाभ्यश्च प्रस्फुटदतिमुक्त-कुसुमसौरभमादाय धीर: समीर: प्रवहति ।

18. देयम् , मार्ग्य:, कारक:, कुम्भकार:, पवित्रम्, दर्शक:, यज्ञ:, राम:, एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$

19. भूतपूर्व:, अधिहरि, हरित्रात:, राजपुरुष:, पञ्चगवम् , घनश्याम:, रूपवद्भार्य:, पितरौ एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$

20. औपगव:, रैवतिक:, राष्ट्रिय:, शाब्दिक:, सार्वभौम:, गोता, गोमान् , लघुतम: एषु **पञ्च** प्रयोगा: साधनीया: । $5 \times 2 = 10$